## कर्तृकर्मणोश्च भूकृञोः । (१२७/३३०८)

भवतेः करोतेश्च धातोः यथासङ्ख्यं कर्तरि कर्मणि चोपपदे, चकाराद् ईषदादिषु च खल् प्रत्ययो भवति । ईषदाढ्यम्भवं भवता[1] । दुराढ्यम्भवम्[1] । ईषदाढ्यङ्करः[2] । स्वाढ्यङ्करो देवदत्तो भवता ।

[३२९] कर्तृकर्मणोश्च्व्यर्थयोरिति वक्तव्यम् । (म. भा. २.१५७)

इह मा भूत्, स्वाढ्येन भूयते ॥

## आतो युच् । (१२८/३३०९)

ईषदादयोऽनुवर्तन्ते । कर्तृकर्मणोः इति[3] न [4]स्वर्यते । [5]कृच्छ्राकृच्छ्रार्थेषु ईषदादिषु उपपदेषु आकारान्तेभ्यो धातुभ्यः युच् प्रत्ययो भवति । खलोऽपवादः । ईषत्पानः सोमो भवता । दुष्पानः । सुपानः । ईषद्दानो [6]गौर्भवता । [7]दुर्दानः । सुदानः ॥

## छन्दसि गत्यर्थेभ्यः । (१२९/३४२१)

ईषदादिषु [8]कृच्छ्राकृच्छ्रार्थेषु उपपदेषु गत्यर्थेभ्यो धातुभ्यः छन्दसि विषये युच् [9]प्रत्ययो भवति । खलोऽपवादः । 'सूपसदनोऽग्निः' (तै. सं. ७.५.२०.१) । सूपसदनमन्तरिक्षम् ॥

## अन्येभ्योऽपि दृश्यते । (१३०/३४२२)

अन्येभ्योऽपि धातुभ्यः गत्यर्थेभ्यः छन्दसि विषये युच् प्रत्ययो दृश्यते । '[10]सुदोहनामकृणोद् ब्रह्मणे गाम्' (नि. ११.४३) । '[11]सुवेदनामकृणोर्ब्रह्मणे गाम्' (ऋ. १०.११२.८)[12] ।

[३३०] भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वक्तव्यः । (म. भा. २.१५७)
दुःशासनः । दुर्योधनः[13] । दुर्दर्शनः । दुर्धर्षणः । दुर्मर्षणः ॥

## वर्तमानसामीप्ये वर्तमानवद् वा । (१३२/२७८९)

समीपमेव सामीप्यम् । ष्यञः स्वार्थिकत्वं [14]ज्ञाप्यते चातुर्वर्ण्यादिसिद्धचर्थम् । [15]वर्तमानसमीपे भूते भविष्यति[16] च वर्तमानाद् धातोः [17]वर्तमानवत् प्रत्यया [18]वा भवन्ति । 'वर्तमाने लट्' (३.२.१२३/२१५१)

---

1. भवता इत्यधिकम् क. फ, स्वाढ्यंभवं भवता इत्यधिकम् क. 2. दुराढ्यंकरो देवदत्तो भवता इत्यधिकम् अ. क. 3. तु इत्यधिकम् अ. ब. ड. 4. स्मर्यते क. 5. कृच्छ्राकृच्छ्रार्थेषु नास्ति फ. 6. गौः नास्ति फ. 7. दुर्दानः सुदानः नास्ति फ. 8. कृच्छ्राकृच्छ्रार्थेषु नास्ति क. 9. प्रत्ययः नास्ति ग. 10. उदाहरणमिदं नास्ति अ. 11. उदाहरणमिदं नास्ति फ. 12. सूपसदनोऽग्निः सूपसदनमन्तरिक्षम् संदृश्यते सुदाहेः इत्यधिकम् ह, अपिशब्दः सर्वोपाधिव्यभिचारार्थः इत्यधिकम् क. 13. अन्तर्भूतण्यर्थोऽत्र युधिः इत्यधिकम् क. 14. धात्वर्थे ब. क. ड. 15. वर्तमानसामीप्ये ह. 16. चार्थे क, धात्वर्थे ह. 17. विभाषा इत्यधिकम् ह. 18. वा नास्ति ग. ह.